फलस्य कर्म्मणोऽभिव्यञ्जकं प्राक् प्रायणादारब्धफलेन कर्म्मणा प्रतिबद्धस्य अभिव्यक्त्यनुपपत्तेः । तच्चाविशेषेण यद्यावत् किञ्चिदनारब्धफलं तस्य सर्व्वस्याभिव्यञ्जकं न हि साधारणे निमित्ते नैमित्तिकमसाधारणं भवितुमर्हति नह्यविशिष्टे प्रदीपसन्निधौ घटोऽभिव्यज्यते, न पट इत्युपपद्यते । तस्मान्निरनुशया अवरोहन्तीत्येवं प्राप्ते ब्रूमः “कृतात्यये अनुशयवानिति”। येन कर्म्मवृन्देन चन्द्रमसमारूढाः फलोपभोगाय तस्मिन्नुपभोगेन क्षयिते तेषां यदम्मयं शरीरं चन्द्रमस्युपभोगायारब्धं तदुपभोगक्षयदर्शनशोकाग्निसंपर्कात् प्रलीयते सवितृकिरणसंपर्काद्धिमकरकाद्रव हुतभुगर्च्चिःसंपर्कादिव च घृतकाठिन्यम् । ततः कृतात्यये कृतस्येष्टादेः कर्म्मणः फलोपभोगेनोपक्षये सति सानुशया एवेममवरोहन्ति । केन हेतुना? दृष्टस्मृतिभ्यामित्याह । तथाहि प्रत्यक्षा श्रुतिः सानुशयानामवरोहं दर्शयति “तद्य इह रमणीयचरणा अभ्यासो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्यासो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चाण्डालयोनिं वेति”। चरणशब्देनानेनानुशयः सूच्यत इति वर्णयिष्यति । दृष्टश्चायं जन्मनैव प्रतिप्राण्युच्चावचरूप उपभोगः प्रविभज्यमानः आकस्मिकत्वासम्भवात् अनुशयसद्भावं सूचयति अभ्युदयप्रत्यवाययोः सुकृतदुःकृतयोः हेतुत्वस्य सामान्यतः शास्त्रेणावगमितत्वात् । स्मृतिरपि वर्णा आश्रमाश्च स्वकर्म्मनिष्ठाः प्रेत्य कर्म्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधायै जन्म प्रतिपद्यन्त इति सानुशयानामेवावरोहं दर्शयति । कः पुनरनुशयो नामेति केचित्तावदाहुः स्वर्गार्थस्य कर्म्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम भाण्डानुसारिस्नेहवत् यथाहि स्नेहभाण्डं विरिच्यमानं न सर्व्वात्मना विरिच्यते भाण्डानुसार्य्येव कश्चित् स्नेहशेषोऽवति ते तथानुशयोऽपीति । ननु कार्य्यविरोधित्वाददृष्टस्य न भुक्तफलस्यावशेषेणावस्थानं न्याय्यम् । नायं दोषः न हि सर्व्वात्मना भुक्तफलत्वं कर्म्मणः प्रतीजानीमहे । ननु निरवशेषकर्म्मफलभोगाय चन्द्रमण्डलमारूढः । बाढं तथापि स्वल्पकर्म्मावशेषमात्रेण तत्रावस्थातुं न शक्यते यथा किल कश्चित् सेवकः सकलैः सेवोपकरणैः राजकुलमुपसृप्तः चिरप्रवासात् परिक्षीणबहूपकरणः छत्रपादुकादिमात्रावशेषो न राजकुलेऽवस्थातुं शक्नोति, एवमनुशयलेशमात्रपरिग्रहो न चन्द्रमण्डलेऽवस्थातुं शक्नोतीति । न चैतद्युक्तमिव न हि स्वर्गार्थस्य कर्म्मणो भुक्तफलस्यावशेषानुवृत्तिरुपपद्यते कार्य्यविरोधित्वादित्युक्तम्। नन्वेतदप्युक्तं न स्वर्गफलस्य कर्मणो निखिलस्य भुक्तफलत्वं भविष्यतीति । तदेतदपेशलं स्वर्गार्थं किल कर्म स्वर्गस्थस्यैव स्वर्गफलं निखिलं जनयति स्वर्गच्युतस्यापि कञ्चित् फललेशं जनयतीति” न शब्दप्रमाणकानामीदृशी कल्पनावकल्पते । स्नेहभाण्डे तु स्नेहलेशानुवृत्तिर्दृष्टत्वादुपपद्यते । तथा सेवकस्योपकरणलेशानुवृत्तिर्दृश्यते न त्विह तथा स्वर्गफलस्य कर्म्मणो लेशानुवृत्तिर्दृश्यते नापि कल्पयितुं शक्यते स्वर्गफलत्वशास्त्रविरोधात् । अवश्यञ्चैतदेवं विज्ञेयं न स्वर्गफलस्येष्टादेः कर्मणो भाण्डानुसारिस्नेहवदेकदेशोऽनुवर्त्तमानोऽनुशय इति यदि हि येन सुकृतेन कर्मणेष्टादिना स्वर्गमन्वभूवन् तस्यैव कश्चिदेकदेशोऽनुशयः कल्प्येत ततो रमणीय एवैकोऽनुशयः स्यान्न विपरीतः । तत्रेयमनुशयविभागश्रुतिरुपरुध्येत “तद्य इह रमणीयचरणाः अथ य इह कपूयचरणा इति”। तस्मादामुष्मिके फले कर्मजाते उपभुक्तेऽवशिष्टमैहिकफलं कर्मान्तरजातमनुशयः तद्वन्तोऽवरोहन्ति । यदप्युक्तं यत्किञ्चित्त्वविशेषेण परामर्शात् सर्वस्येह कृतस्य कर्मणः फलोपभोगेनान्तं प्राप्य निरनुशया अवरोहन्तीति । नैतदेवम् अनुशयसद्भावस्यावगमितत्वात् । यत्किञ्चिदिह कृतमामुष्मिकफलं कर्मारब्धभोगं तत् सर्वं फलोपभोगेन क्षपयित्वेति गम्यते । यदप्युक्तं प्रायणमविशिष्टत्वादनारब्धफलं कृत्स्नमेव कर्माभिव्यनक्ति तत्र केनचित् कर्मणामुष्मिँल्लोके फलमारभ्यते केनचिदस्मिन्नित्ययं विभागो न सम्भवतीति । तदप्यनुशयसद्भावप्रतिपादनेनैव प्रत्युक्तम् । अपि च केन हेतुना प्रायणमनारब्धफलस्य कर्मणोऽभिव्यञ्जकं प्रतिज्ञायत इति वक्तव्यम् आरब्धफलेन कर्म्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तेस्तदुपशमात् प्रायणकाले वृत्त्युद्भवो भवतीति यद्युच्येत ततो वक्तव्यं यथैव हि प्राक्प्रायणादारब्धफलेन कर्म्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तिरेवं प्रायणकालेऽपि विरुद्धफलस्यानेकस्य कर्म्मणः युगपत्फलारम्भासम्भवाद्बलवता प्रतिबद्धस्य दुर्बलस्य वृत्त्युद्भवानुपपत्तिरिति । नह्यनारब्धफलत्वसामान्ये जात्यन्तरोपभोग्यफलमप्यनेककर्म्मैकस्मिन् प्रायणे युगपदभिव्यक्तं सदेकां जातिमारभत इति शक्यं वक्तुं प्रतिनियतफलत्वविरोधात्। नापि कस्यचित् कर्म्मणः प्रायणे अभिव्यक्तिः कस्यचिदुच्छेद इति